Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
( Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:8(1), August, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

# पुराणेषु नारीशिक्षा : एकमध्ययनम्

**ड.पम्पा राणी गिरि**
शोधच्छात्रा, साहित्यविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**शोधसारः**

भारतीयं सांस्कृतिकं वैभवं यत्र धर्मः, नीतिः, आचारः, जीवनशैली च सम्मिलिताः, तत्र स्त्रीणां शिक्षायाः विषये अपि परिपक्वं चिन्तनं दृश्यते। वेदेषु यद्यपि स्त्रीणां आध्यात्मिकं, दार्शनिकं च योगदानं दृष्ट्वा शक्यते, तथापि पुराणेषु तस्य अधिकं विस्तारः दृश्यते। पुराणानि केवलं धार्मिककथानकानि न सन्ति, अपि तु सामाजिक-नैतिकमूल्यानां प्रकाशकानि अपि भवन्ति। तत्र स्त्रीशिक्षाया विषये यत् विवेचनं दृश्यते, तत् आद्यकालीनभारतीयसमाजस्य दृष्टिकोनं सूचयति। भारतीयसभ्यता विश्वे एकस्मिन् विशिष्टं स्थानं धारयति। तत्र समाजे तादृशः स एव सभ्य इति गण्यते, यत्र प्रत्येकः मानवः आध्यात्मिकव्यावहारिकशिक्षया आत्मानं समाजस्य उत्कृष्टाङ्गत्वेन सम्यगवस्थानं प्राप्नोति। अस्मिन्नेव सन्दर्भे शिक्षा मानवजीवनस्य सर्वोत्कृष्टं साधनमिति दृश्यते।

शिक्षाया महत्त्वं केवलं पुरुषाणाम् अपि न, अपितु स्त्रीणां कृते अपि समप्रमाणेन अतीव आवश्यकमिति प्राचीनविचारधारायामपि प्रतिपादितम्। स्त्रीशिक्षाया चर्चायाः प्राक्, स्त्रीणां कृते उपनयनसंस्कारस्य अस्तित्वं, स्वरूपं च विवेचनं अतीव आवश्यकम्। आपस्तम्बः, भरद्वाजः च उपनयनं विद्याप्राप्तये आवश्यकं संस्काररूपेण स्वीकरोति स्म। एवं च न केवलं पुरुषाणां कृते, अपितु स्त्रीणामपि विद्याध्ययनस्य प्रारम्भे उपनयनसंस्कारः प्राचीनकाले अस्तीत्यपि स्पष्टं दृश्यते। स्त्रीणां कृते अपि ब्रह्मचर्यव्रतं, वेदाध्ययनं, भिक्षाचार्यपद्धतिः च सम्यगस्ति स्म। ताः "ब्रह्मवादिन्यः" इत्यकथयन्।

ब्रह्मवादिन्यः ताः स्त्रियः आसन्, याः आजीवनं विवाहं विना ब्रह्मचर्यव्रतं पालयन्त्यः स्वगृहे एव वेदाध्ययनं कुर्वन्त्यः, अग्निहोत्रादिकं च सम्पादयन्त्यः। एतासां कृते उपनयनं, अग्न्याधानम्, भिक्षाचार्यापि विधेयम् आसीत्। एवं च वेदवती, कुशध्वजस्य पुत्री, ब्रह्मवादिनीनां प्रमुखा दृष्टव्यास्ति। सा आजीवनम् अविवाहितेति, वेदाध्ययनं कृत्वा तपश्चर्या अपि अतीव कठिना अकरोत्।

पुराणानुसारं, स्त्रीणां शिक्षा केवलं वैयक्तिकविकासाय न, अपि तु धर्मसंरक्षणाय, कुलरक्षणाय, समाजविकासाय च अभिप्रेतम्। शिक्षिता स्त्री धर्मपथे चलन्तं कुलं निर्माति। पुराणेषु उपदिश्यते यत् – "यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।" एषा पूज्या नारी शिक्षिता एव भवति। शिक्षायाः माध्यमेन स्त्री आत्मशक्तिं बोधयति, आत्मविश्वासं विकसयति, धर्मे च निष्ठा स्थापयति।

**कुञ्जीशब्दाः** – शिक्षास्थानम्, धार्मिकशिक्षा, व्रतशिक्षा, आतिथ्यशिक्षा, गृहकार्यशिक्षा, संगीतशिक्षा, सैन्यशिक्षा।

---------------

## प्रस्तावना

पुराणम् – इतिवृत्तात्मकसाहित्यस्य एकं प्रमुखं रूपम् अस्ति, यत् न केवलं धार्मिकदृष्ट्या अपि तु सांस्कृतिकदृष्ट्या च अत्यन्तं महत्वपूर्णं मन्यते। संस्कृतभाषायां 'पुराण'शब्दस्य व्युत्पत्तिः "पुरा अपि नवम्" इति सूत्रेण विवृणुते – यत् पुरातनं सन् अपि नवं शिक्षां प्रददाति। पुराणं तु प्राचीनं दीर्घकालपरम्परायाः ज्ञानराशिं वहति।पुराणानां धार्मिकदृष्ट्या महत्वमधिकम्। वेदविहितानां धर्माणां सरलसुबोधभाषायां वर्णनायैव पुराणानि विरचितानि –

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
( Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:8(1), August, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति(प्रहरेदिति) ॥[1]

विश्वेतिहासे भारतीयसभ्यताया उत्कृष्टं स्थानमस्ति। समाजे सैव सभ्येति कथ्यते यत्र प्रत्येकमानव आध्यात्मिक व्यावहारिकशिक्षया आत्मानं समाजस्य उत्कृष्टाङ्गत्वेन प्रापयेत्। अस्मिन् कार्ये उत्तमा शिक्षा एव मानवानां लक्ष्यपूर्ती कार्यकारिणी भवति । उक्तं च-

अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शनम् ।
सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः॥[2]

पुनश्च -

माता शत्रुः पिता वैरी येन बालो न पाठितः ।
न शोभते सभामध्ये हंसमध्ये वको यथा ॥[3]

अथ च -

"अथ य इच्छेद् दुहिता मे पण्डिता जायेत सर्वमायुरियादिति तिलौदनं पाचयित्वा सर्पिष्मन्तमश्नीयाता- मीश्वरो जनयिता वै"।[4]

स्त्रीशिक्षाविषये विवेक्तुम् आरम्भात्पूर्वमेव स्त्रीणामपि उपनयनसंस्कारः कथं संवृत्तः को वा विधिः प्रोक्तो बुधवरैः ? इत्यादिविषयान् परिशीलयामः।

आपस्तम्बो भरद्वाजश्चोभावेव विद्याप्राप्तये उपनयनस्योद्देश्यं मन्येते। उपनयनं विद्याध्ययनेच्छुकस्य कृते श्रुत्यनुसारं कर्म संस्कार इति प्रोच्यते -

"उपनयनं विद्यार्थस्य श्रुतितः संस्कार इति" ।[5]

मनुनापि प्रोक्तम्-

वैदिकैः कर्मभिः पुण्यैर्निषेकादिर्द्विजन्मनाम् ।
कार्यः शरीरसंस्कारः पावनः प्रेत्य चेह च ॥[6]

पुरुषवर्गो वा स्त्रीवर्गो विद्याध्ययनतः प्राग् उपनयनद्वारैव विद्यारम्भसंस्कारे प्रवेष्टुमर्हति। यमादिस्मृतिषु नारीणां कृते उपनयन संस्कारस्य स्पष्टतरोल्लेखोऽस्ति -

पुराकल्पे तु नारीणां मौञ्जीबन्धनमिष्यते ।
अध्यापनं च वेदानां सावित्रीवचनं तथा ॥
पिता पितृव्यो भ्राता वा नैनामध्यापयेत्परः ।
स्वगृहे चैव कन्याया भैक्ष्यचर्या विधीयते ॥[7]

अतः स्पष्टमेव यत् प्राचीनकाले स्त्रियोऽपि ब्रह्मचर्यं धृतवत्यो मुञ्जमेखलां पर्यधार्षुः। वेदानां सावित्रीगुरुमन्त्राणां च पाठमकार्षुः। प्राचीनसमये उपाध्यायानीतः समाजेऽतिरिक्तशिक्षितमहिलानां मध्ये एकोऽन्यप्रकारोऽप्यासीत्।

तत्र ब्रह्मवादिनीनामुपनयनम्, अग्न्याधानम्, वेदाध्ययनं स्वगृहे भिक्षाचर्येति। सद्योवधूनामुपस्थिते विवाहे कथञ्चिदुपनयनमात्रं कृत्वा विवाहः कार्यः। अर्थाद् ब्रह्मवादिनीनां स्त्रीणामुपनयनस्य अग्निहोत्रस्य वेदाध्ययनस्य स्वगृहे भिक्षादानस्य च विधानमस्ति।

अतः स्पष्टं भवति यद् ब्रह्मवादिनीनारीणाम् उपनयनसंस्कारो बभूवेति। ता वेदाध्ययनं कुर्वन्ति स्म। तथा तासां छात्रजीवनं रजस्वलातः प्राग् युवावस्थातः पूर्वं समभवत्। संस्काराणां विषये चर्चा विधाय मनुना निष्कर्षोऽयं निःसारितः।

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
( Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:8(1), August, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

इमानि कृत्यानि नारीणां कृतेऽपि यथावद्रूपेण क्रियन्ते स्म, किन्तु विना मन्त्रम्। परन्तु केवलं विवाहसंस्कारे स्त्रीणां कृते वैदिकमन्त्राणां प्रयोग आसीत्-

अमन्त्रिका तु कार्येयं स्त्रीणामावृदशेषतः ।
संस्कारार्थे शरीरस्य यथाकालं यथाक्रमम् ॥
वैवाहिको विधिः स्त्रीणां संस्कारो वैदिकः स्मृतः ।
पति-सेवा गुरौ वासो गृहार्थोऽग्निपरिक्रिया ॥[8]

**धार्मिकशिक्षा –**

पुराणयुगं धार्मिकयुगमासीत्। स्त्रीजनान् सत्कृत्ये नयन्ति स्म प्रेरयामासुश्च तासां पिता, पतिः, कुटुम्बस्य वयोवृद्धाश्च, तेषामिदमेव परमोद्देश्यं परमप्रयत्नश्चासीत्। सन्तानप्राप्तौ पतिरक्षायां सुखशान्तिहेतौ च पुरुषाणां समान एव कर्त्तव्यं स्त्रीणामप्यासीत् तथा धर्मकार्यकृतेऽपि निरोधो न ह्यासीत्। स्त्रीद्वारा कठोरतपःकरणस्य अतिथिसत्कारस्य मन्त्रोच्चारणस्य मन्त्रबलेन स्तम्भनादेः प्रमाणं पुराणेषु प्राप्यते।

अनेन वार्तेयं पुष्यति यद् एतादृशी धार्मिकशिक्षा तासां कृते कुटुम्बात् समये समये मिलति स्म। इदानीमस्य किञ्चिदुदाहरणं पुराणद्वारा दास्यते।

वायुपुराणे समुल्लेखो मिलति यद् एकस्मिन् समये दैत्यगुरुः शुक्राचार्यः शङ्करसमीपे मृत्युसञ्जीविनीमन्त्रशिक्षां ग्रहीतुं जगाम। तदा देवैरसुरा युद्धाय आहूयन्ते स्म। असुराः पराजिताः, भृगुपत्नीं काव्यमातरं शरणङ्गताः। काव्यमात्रा असुराणां कृतेऽभयं ददे। इन्द्रो यदा विष्णुं सहायकत्वेनादायासुरैः सह योद्धुं समागतः, तदा काव्यमाता तौ निरुन्धती सती कथयाम्बभूव यद् यदि युवामग्रे आयास्यथस्तर्हि स्वतपोबलेन विष्णुसहितं त्वां धक्ष्यामि-

एषा त्वां विष्णुना सार्धं दहामि मघवानिव ।
मिषतां सर्वभूतानां दृश्यतां मे तपोबलम् ॥[9]

अपरं च, क्रुद्धा काव्यमाता वचनमिदमब्रवीत्-

मघवंस्त्वां भक्ष्यामि सविष्णुं वै तपोबलम् ॥
पश्यतां सर्वदेवानामीदृशं मे तपोबलम् ।
इत्युक्तौ तु तया देवौ विष्णिवन्द्रौ योगविद्यया ।
अभिभूतौ महात्मानौ स्तब्धौ तौ सम्बभूवतुः ॥[10]

वायुपुराणेऽपि एकोऽपरः प्रसङ्गः समुपलभ्यते गयामाहात्म्ये। धर्मनामक एको राजा बभूव। तस्यैका पुत्री समुत्पन्ना, तस्या नाम धर्मव्रता आसीत्। देवास्तां च अब्रुवन् -

अग्निमध्ये तपः कर्तुं कस्य शक्तिः पतिव्रते !
त्वया कृतं तत्परमं सर्वलोकभयङ्करम् ॥[11]

**व्रतशिक्षा –**

अहल्यायाः कन्याया योगलक्ष्म्याः पूर्वजन्मनः स्मरणमासीत्। पूर्वजन्मनि अवशिष्टं कृत्तिकाव्रतं सा पूर्ववत् कृत्वा पूर्णीकर्तुमियेष। एकस्मिन् समये योगलक्ष्मीं दृष्ट्वा महर्षिरत्रिः पृष्टवान्- हे अत्यन्तभाग्यशालिनि ! इदानीं तव कृत्तिकाव्रतं कियन्मात्रमवशिष्टं वर्तते। एतच्छ्रुत्वा सा योगलक्ष्मीः पूर्वव्रतं स्मृतवती शेषं षड्छतानि मेऽवशिष्टानीति प्राह। तदाऽत्रिमहर्षिः करुणया श्रद्धया च पूर्णीभूय योगलक्ष्मीकृते ईदृशं योगमन्त्रं प्रादाद् येन सा पूर्वजन्मनः शेषव्रतं पूर्णीकृतवती

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
( Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:8(1), August, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

तच्छ्रुत्वास्यै भगवता सकारुण्येन चेतसा ।
दत्तं व्रतं तथा मन्त्रो येन स्वर्गं जगाम सा ॥[12]

एवमेवाऽश्वपतिराजकन्यया युवावस्थां प्राप्य नारदद्वारा दत्तस्य सावित्रीव्रतस्यानुष्ठानम् अकारि -

सा तु पद्मपलाशाक्षी प्रज्वलन्ति व तेजसा ।
चकार सा च सावित्रीव्रतं यत् भृगुणोदितम् ॥
अथोपोष्य शिरःस्नाता देवतामभिगम्य सा ।
हुत्वाग्निं विधिवद् विप्रान् वाचयित्वेन्दुपर्वणि ॥[13]

**आतिथ्यशिक्षा –**

अतिथिं प्रति कीदृग् व्यवहारो भवेत् तस्य सत्कारक्रियादिः स्याद् इत्यादीनां विचारोऽपि सम्यक्प्रकारेण पुराणेषु वर्तते। येन ज्ञायते यद् अस्याऽपि शिक्षा कन्यानां कृते विवाहतः प्राक् प्रदत्तासीत्।

शिवपुराणे आख्यानमिदं दृश्यते यद् आहुकभिल्लस्य पत्नी आहुकापि यदा शङ्करः स्वयं संन्यासिवेषं संधृत्य परीक्षाहेतोः समाजगाम तदा भिल्लद्वारा अतिथिनिवासाय निषेधानन्तरं सा अतिथिसेवाया महत्त्वं पतिं बोधयति प्रदर्शयति च । अतो भिल्लनीकृतेऽपि अतिथिसेवायाः शिक्षा सम्मिताऽऽसीत्।[14]

राजानं सुदासं प्रति यदा वसिष्ठः शशाप तदा स स्वं निरपराधं मत्वा प्रतिशापाय जलम् उत्थापयामास तदा तत्पत्नी गुरुशापाय निरुरोध वर्जितवती च तमिति। एभिरुपरिदृष्टोदाहरणैः स्पष्टमेतद् यत् पुराणसमये धार्मिकशिक्षायाः प्रचलनं नारीसमाजेषु आसीत्। पूजा-सन्ध्या-तप-अतिथिसेवा-धार्मिकशिक्षादयः पुराणसमये नारीजनेषु अधिकाधिकमात्रायां प्रचलिता बभूवुः।

**गृहकार्यशिक्षा –**

भविष्यपुराणस्य द्वादशाध्याये तर्कुकर्मणस्तैलाद्युष्णकर्मणो विधानं विस्तरेण विलिलेख। विष्णुपुराणस्य पञ्चमांशे सप्तविंशाध्याये विवरणं मिलति यत् शम्बरस्य पत्नी मायावती पाकशास्त्रस्य सम्पूर्णज्ञानवती बभूव -

तस्य मायावती नाम पत्नी सर्वगृहेश्वरी ।
कारयामास सूदानामाधिपत्यमनिन्दिता ॥[15]

सन्तानपरिपालन-शिक्षा-पतिसेवा-अतिथिसेवादयोऽपि स्त्रीणामेव धर्माः, अस्यापि विवरणं पुराणेषु मिलति। शुक्राचार्यस्य पुत्र्या अरजायाः स्वपितुरनुपस्थितौ अग्निरक्षाकरणस्य विवरणं वामनपुराणे मिलति -

अरजाः स्वगृहे वह्निं शुश्रूषन्ती महासुर ![16]

मातर एव कन्यानां कृते संगीतशिक्षां गृहकार्यशिक्षां च समये समये प्रादुः । एतद्विषये कूर्मपुराणीयं विवरणं प्रदीयते । धीमतीं नाम कन्यां तन्मातैव संगीतादिकं शिक्षितवती -

रूपलावण्यसम्पन्नां ह्रीमतीमिति कन्यकाम् ॥
ततस्तं जननीपुत्रं बाल्ये वयसि शोभनम् ।
शिक्षयामास विधिवद् गानविद्यां च कन्यकाम् ॥
कृतोपनयनो वेदान् अधीत्य विधिवद् गुरोः ।
उद्विवाहात्मजां कन्यां गन्धर्वाणां तु मानसीम् ॥[17]

भविष्यपुराणे विवरणमेतद् यद् एका स्वर्णवती-नामिका स्त्री सर्वविद्यायां पारङ्गतासीत् -

ज्ञात्वा स्वर्णवती देवी सर्वविद्याविशारदा ।[18]

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
( Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:8(1), August, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

**संगीतशिक्षा -**

स्कन्दमहापुराणे नागकन्या रत्नावलीद्वारा स्वकीयोभय-सखीभ्यां सह संगीत-नृत्य-वाद्यादिभिः गायनस्य सम्यग् उल्लेखः प्राप्यते -

तिस्रोऽपि गीतं गायन्ति लसदङ्गान्धारसुन्दरम् ।
रासमण्डलभेदेन लास्यं तिस्रोऽपि कुर्वते ॥
वीणावेणुमृदङ्गाश्च लयतालविचक्षणः ।
वादयन्ति मुदायुक्तास्तिस्रोऽपीश्वरसन्निधौ ॥[19]

संगीतनृत्यादीनां सम्बन्धे स्कन्दपुराणे उपर्युक्तोदाहरणैः सह अन्यान्यपि अनेकोदाहरणानि यत्र तत्र द्रष्टुं मिलन्ति। यथा काशीनगर्यां वीरेश्वरलिङ्गपूजनसमये पत्न्यः स्वकीयपतिभिः सह नृत्यन्त्यो गायन्त्यो वीरेश्वरं समाराधयन्ति -

षण्मासात्सिद्धिमगमद् बहुनीराजनैरिह ।
किन्नरी हंसपद्यत्र भर्त्रा वेणुप्रियेण वै ॥
गायन्ती सुस्वरं याता परां निर्वाणभूमिकाम् ।[20]

तथा च -

नृत्यन्ती निजभावेन पुरा ह्यत्राप्सरोवरा ॥
सदेहकोकिलालापा लिङ्गमध्ये लयङ्गता ।

एवमेवास्मिन्नेव स्कन्दपुराणेऽपरमपि उदाहरणम्। यथा हि चतुःषष्टियोगिन्यागमनवर्णने योगिनीनाम् अनेककलाभिः सह नृत्यसंगीतवादनकलानामपि श्रेष्ठोल्लेखो वर्तते-

एका च नृत्यकुशला त्वन्या गानविशारदा ।
अपरा वेणुवादज्ञा परा वीणाधराऽभवत् ॥
मृदङ्गवादनज्ञाऽन्या काचित् तालकलावती ॥[21]

श्रीमद्भागवतपुराणेऽपि गोपीनां गीतं विद्यते। ब्रह्मवैवर्तपुराणे कश्यपपुत्र्या मनसायाः पूजया प्रसन्नः श्रीशङ्करोऽधोलिखिता विद्याः प्रादाद् मनसाकृते -

कुमारी सा च सम्भूय जगाम शङ्करालयम् ।
भक्त्या सम्पूज्य कैलासे तुष्टाव चन्द्रशेखरम् ॥
दिव्यं सहस्रं च तं सिषेव मुनेः सुता ।
आशुतोषो महेशश्च तां च तुष्टो बभूव ह ॥
महाज्ञानं ददौ तस्यै पाठयामास साम च ।
कृष्णमन्त्रं कल्पतरुं ददावष्टाक्षरं मुनेः ।
लक्ष्मीर्माया कामबीजं डेऽन्तं कृष्णपदं तथा ॥
त्रैलोक्यमङ्गलं नाम कवचं पूजनक्रमम् ॥
सर्वपूज्यं च स्तवनं ध्यानं भुवनपावनम् ।
पुरश्चर्याक्रमं चापि वेदोक्तं सर्वसम्मतम् ॥
प्राप्य मृत्युञ्जयाद् ज्ञानं परं मृत्युञ्जयं सती ।
जगाम तपसे साध्वी पुष्करं शङ्कराज्ञया ॥[22]

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
( Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:8(1), August, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

सुस्पष्टं भवत्यनेन आसामगानम् आमृत्युञ्जयमन्त्रं च स्त्रीणां कृते पुराणकाले पठनपाठनस्य पूर्णाधिकारः प्राप्तो बभूवेति। वाराहपुराणेऽपि काञ्चीराजस्य पुत्री चतुःषष्टिकलासु पारङ्गगताऽऽसीत्। अस्यापि विवरणं मिलति।

काञ्चीराजस्य वै सुता रूपयुक्ता, गुणवती, दक्षा, सर्वाङ्गसुन्दरी चासीत् -

चतुःषष्टिकलायुक्ता कोकिलेव सुखस्वरा ।
कलिङ्गराजपुत्रेण विधिना तु विवाहिताः॥[23]

**राजनीतिशिक्षा**

पुराणकाले राजनीतेः सैन्यशिक्षायाश्चापि प्रचलनं सम्भाव्यते। यद्यपि प्रस्फुटं विशदं च विवरणं पुराणसमये नोपलभ्यते तथापि एतादृश्यो वीराङ्गनाः सन्ति याश्च स्वपुत्राणां पतीनां च कृते राजधर्मशिक्षां प्रदाय समये समये च तान् प्रबोधयन् प्रोत्साहितवत्यः। आसां वीरमातृणां समुल्लेखः प्रबन्धेऽस्मिन् पञ्चमपरिच्छेदे विस्तरेण कृतः। अत एवात्र संक्षेपतो विधास्यते येन राजनीतेः सैन्यशिक्षाया अपि आसां ज्ञानमासीदिति ज्ञानं भवेत्।

मार्कण्डेयपुराणे करन्धमस्य पत्न्या वीरायाः प्रसङ्गो मिलति। तथा हि यदा वीरायाः पुत्रोऽवीक्षितो विशालनगरस्य स्वयंवरे राजभिः परावृत्य वन्दीकृतस्तदा वीरा स्वपतिकृते राजधर्मस्य क्षात्रधर्मस्य च परिचयं प्रदाय पुत्रकृतं कार्यं प्रशंस्य च शत्रून् प्रति युद्धाय स्वपतिं करन्धमं प्रेषयामास। अतोऽनेन आख्यानेन ज्ञायते यद् वीराऽपि राजनीतिज्ञा शिक्षाशास्त्रप्रवीणा चासीत्।[24]

मार्कण्डेयपुराण एव एकाऽपरा राजमहिषी इन्द्रसेना स्वपुत्रं पितृहन्तुः शत्रु-राजस्य वपुष्मतः समीपे प्रतिकाराय सुन्दरप्रकारेण राजनीतिविषयमुपदिश्य प्रेरयामास प्रेषयामास चेति। तदा तत्पुत्रो दमोऽपि प्रतिशोधं कृतवान् । एतदपि राजमहिषीद्वारा प्रदर्शितं राजनीतेः सैनिकशिक्षायाश्च फलं प्रतीयते।

मार्कण्डेयपुराणे मदालसायाः समुल्लेखो वर्तते। सापि स्वपुत्राय अलर्काय धर्म-अर्थ-काम-मोक्ष एभिश्चतुर्भिः सह राजनीतेरपि उपदेशं प्रादात्। एभिर्विवरणैः प्रतीयते पुराणकालेऽवश्यमेव नारीणां राजधर्मस्य विशेषज्ञानमासीत्।

काश्चन नार्यो रणक्षेत्रे गत्वा युद्धमप्यकार्षुः। कल्किपुराणस्य तृतीयांशे स्त्रीद्वारा कल्किना सह युद्धकरणस्य उत्तमं विवरणं प्राप्यते -

तेषां स्त्रियो रथारूढा गजारूढा विहङ्गलान्।
समारूढा हयारूढा खरोष्ट्रवृषवाहनाः ॥
योद्धं समाययुस्त्यक्त्वा पत्यपत्यसुखाश्रयान् ।
रूपवत्यो युवत्योऽतिबलवत्यः पतिव्रताः ॥
नानाभरणभूषाढ्याः सन्नद्धा विशदप्रभाः ।
खड्गङ्गशक्तिधनुर्बाणवलयात्तकराम्बुजाः।
स्वैरिण्योऽप्यथ कामिन्यः पुंश्चल्यश्च पतिव्रताः ।
ययुर्योद्धं कल्किसैन्यैः पतीनां निधनातुरा ॥[25]

स्कन्दपुराणे मुरदैत्यपुत्री कामकटङ्कटाया विषये धर्मपुत्रपाण्डवान् प्रति घटोत्क चस्य विवाहप्रसङ्गे श्रीकृष्णः कथयति यद् यदाऽहं नरकासुरनामकदैत्यस्य वधाय अगमम्, तदा तत्र मुरनामकं दैत्यम् अवधिषम्। तस्मिन् समये तत्पुत्री कामकटङ्कटा मां युद्धाय प्रावोचत्। सा तु बहु बलशालिनी वर्तते, अतस्तया सह घटोत्कचस्य विवाहो विधातव्यः। एवंकृत्वा प्रशशंस -

ततो हते मुरौ दैत्ये मया तस्य सुताव्रजत् ।

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
( Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:8(1), August, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

योद्धं मामतिवीर्यत्वाद् घोरा कामकटङ्कटा ॥
अयोधयं महाबाणैः सुशार्ङ्गधनुषश्च्युतैः ॥
तां ततोऽहं महायुद्धे खड्ङ्गखेटकधारिणीम् ।
खड्गेन चिच्छेद बाणान्मम सा च मुरोः सुता ।
समागम्य च खड्गेन गरुडं मूर्ध्यताडयत् ॥
स च मोहसमाविष्टो गरुडोऽभूदचेतनः ।
ततस्तस्या वधार्थाय मया चक्रं समुद्यतम् ॥[26]

मार्कण्डेयपुराणे श्रीमद्देवीभागवतपुराणे दुर्गासप्तशत्यादौ च देवीमाहात्म्यं मिलति। जगन्मात्रा शक्तिस्वरूपया युद्धे गत्वा चण्डमुण्डं तथा महिषासुरादीन् दैत्यान् मारयित्वा विजयप्राप्तिकरणस्य विस्तृतोल्लेखो दरीदृश्यते ।27

**सैन्यशिक्षा -**

विष्णुपुराणे एकोपाख्यानं स्त्रीयुद्धसमर्थकमस्ति। एकदा महर्षिगर्ग नपुंसकं कथयित्वा यादवा हसन्ति स्म। येन क्रुद्धीभूय यादववंशं नाशयितुं तपश्चकार गर्गः। तस्य तपः समये तस्य सेवायां यवनस्तथा यवनपत्नी चास्ताम् । ऋषिणा यादव-नाशाय सरलोपायो मनसि विचारितः। ऋषिणा यवनीसकाशाद् एकः सन्तानः समुत्पादितः। स एव सन्तानः कालयवननाम्ना प्रसिद्धः। तस्मै राज्यं दत्त्वा गर्गस्तपः कर्तुं पुनर्वनं जगाम। तदनन्तरं कालयवनस्य कृष्णेन सह युद्धं बभूव। इतोऽपि कृष्णस्य जरासन्धाद् भयमासीत्। यादववंशसेनयोश्च नाशभयात् कृष्णेन द्वारकापुरी निर्मापिता। सा पुरी दुर्गाकारेण सम्पादिता। तदनन्तरं श्रीकृष्णो यादवान् प्रति प्रावोचत् । यद्यत्र स्त्रियोऽपि योद्धं प्रभवन्ति तत्र यादवानां कुतो भयमिति -

स्त्रियोऽपि यत्र युद्धेयुः किं पुनर्वृष्णिपुङ्गवाः।[28]

अतः प्रसङ्गेनानेन पुराणकाले स्त्रियोऽपि युद्धविशारदाः समभवन्। इमानि सर्वाणि प्रमाणानि उदाहरणानि च इमां वार्ता पुष्टीकुर्वन्ति यत् पुराणकाले स्त्रियोऽपि राजनीतिनिपुणाः समरविशारदाश्चासन्। एतावानेव न किन्तु पुराणसमये स्त्रीषु चतुःषष्टिकलानैपुण्यमासीत्। मार्कण्डेयपुराणानुसारं कलावती-नामिका कन्या दक्षसुता-सतीसकाशात् पद्मिनी-नाम विद्यां प्राप्तवती -

यस्य वत्से ! प्रभावेण विद्या यास्तां गृहाण मे।
पद्मिनी नाम विद्येयं महापद्माभिपूजिता ।।
इत्याह मां दक्षसुता सती सत्यपरायणा ।
स्वरोचिस्त्वं ध्रुवं देवी नान्यथा सा वदिष्यति ।।[29]

अस्मिन्नेव मार्कण्डेयपुराणे एकस्मिन् अन्यप्रसङ्गे इन्दीवराख्यस्य सुता मनोरमा स्वारोचिनामकयुवकं प्रति सानुरोधं कथयति यद् एकस्माद् राक्षसाद् मोचय मां यतो हि मम समीपे सम्पूर्णास्त्राणां हृदयरूपी विद्याऽस्ति। या च मया स्वपितृसकाशात् शिक्षिता। सा च विद्या भवत्कृते दीयते, तया विद्यया अस्माद् राक्षसाद् रक्षतु भवान् -

मयाऽपि शिक्षितं वीर ! सकाशाद् बालया पितुः।
हृदयं सकलास्त्राणामशेषरिपुनाशनम् ॥
तदिदं गृह्यतां शीघ्रमशेषास्त्रपरायणम् ।
ततो जहि दुरात्मानमेनं ब्रह्म समागतम् ।।[30]

पुराणेषु किञ्चिदीदृग् नारीणामपि प्रसङ्गो वर्तते याः स्वतर्कशक्त्या मृतपतिमपि जीवितम् आनैषुः । अयं च न्यायसङ्गततर्कशिक्षाया एव परिणामोऽस्ति। अत्र च विषये उपबर्हणस्य पत्नी मालावती तथा सत्यवतः पत्नी सावित्री

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
( Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:8(1), August, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

प्रधानतमाऽस्ति। गन्धर्वराजस्य पुत्र उपबर्हणोऽनेककन्याभिः सह विवाहं कृतवान्। तस्य पञ्चा-शद्राज्ञीषु प्रधानमहिषी मालावती भवति स्म। एकदा रम्भाया नवयौवनं वीक्ष्य तन्मनो विचलितं बभूव। तेन संकुप्य ब्रह्मा नीचयोनिगमनाय शशाप। तेन शापेन स्वयं कृतकर्मणा च विलज्य उपबर्हणः स्वशरीरं मुमोच। पतिविरहेण मार्मिक विलपती सती पतिव्रता मालावती विष्णुना कालपुरुषेण देवैः शिवेन धर्मेण च सह तर्क चकार। सावित्री केवलं यमेन सह तर्क कृत्वा यममेव सन्तोषयामासः परन्तु मालावती समग्रदेवैः सह तर्क विधाय सर्वान् देवान् अतूतुषत्। ब्रह्मा तथा विष्णुर्मालावतीकर्मणा सन्तुष्य तत्पतेरुपबर्हणस्य जीवनदानं ददौ।[31]

**शिक्षास्थानम् –**

हिन्दूसमाजे यत् प्रारम्भिकशिक्षास्थलमासीत् तत्तु हिन्दूपरिवारमेव, न त्वन्यत्। वैदिककालस्य आपूर्वार्द्ध बालकबालिकयोः शिक्षा परिवाराभ्यन्तरे माता-पिता-पितृव्य-भ्राता चेत्यादिद्वारैव बभूवः परन्तु यदा परिवारस्य कार्यक्षेत्रं वर्धयामास तदा कतिपया विशिष्टब्राह्मणाः शिक्षणकार्य स्वहस्ते जगृहुः। अनुशासनस्य शीलस्य अनुवृत्तेर्वा कृतेऽधिकसुसंघटित-शिक्षासंस्थाया आवश्यकता भवति स्म। सैव शिक्षासंस्था गुरुकुलनाम्ना प्रसिद्धा । एतद् गुरुकुलम् अरण्ये किञ्चिन्नगराद् दूरं वा आसीत्, येन विद्यार्थिनां प्राकृतिकवन्यजीवनस्य कृत्रिमनागरिकजीवनस्य च उभयोरपि बोधः सम्भवेद् इति कृत्वैव व्यवस्थेयं सञ्जाता । परशुराम-अगस्त्य-कण्व-सान्दीपनि-शुक्राचार्य-वाल्मीकि इत्यादयो महान्तो विद्वांसो गुरुकुलस्य प्रवर्तकाः सञ्चालकाः कुलपतयश्चासन्। एषां महापुरुषाणां समीपे धनिनो निर्धनाश्च विद्यार्थिनोऽध्ययनार्थं समागत्योषुः। महर्षिवाल्मीक्याश्रमे लवकुशौ निवसतः स्म। आत्रेयी अगस्त्याश्रमे स्थित्वा वेदान्तशिक्षां प्राप्तवती। शुक्राचार्यस्याश्रमे कच-देवयानी-भूरिवसु-देवरात इत्यादयः छात्राः पठन्ति स्म । ते वैदिकग्रन्थाद् आरभ्य सैनिकशिक्षां यावद् एषु आश्रमेषु प्राप्नुवन्ति स्म। विद्यार्थिनां विद्यार्थिनीनां च नाम्ना ज्ञायते यत् तत्समये जनाः सहशिक्षां निकृष्टां न मन्यन्ते।

अपि तु समाद्रियन्ते। ततः पश्चात् स्मृतिसमये नारीशिक्षायाः प्रभावः स्वल्पमात्रायां समजनि। नारीणां कृते सहशिक्षा अतीव निकृष्टा मन्यते स्म जनैरिति। यद्यपि केचन स्मृतिकारा मनुयमादयः किञ्चित्सीमां यावत् स्त्रीशिक्षायाः पक्षे बभूवुः, परं बहुमतेन विरोधिन एव समजनिषत। यमानुसारं यथा-

पिता पितृव्यो भ्राता वा नैनामध्यापयेत्परः।
स्वगृहे चैव कन्याया भैक्ष्यचर्या विधीयते॥[32]

स्मृतिसमये ब्रह्मचर्यपालनस्य अध्ययनस्य वा नारीणां कृते स्वतन्त्रतासत्त्वेऽपि अस्यां वार्तायां महान् प्रतिबन्ध आसीत्। ताः स्वाध्ययनस्य कार्य पितुः भ्रातृव्यस्य भ्रातुर्वा निकटे कुर्युर्नान्यत्रेति ।

स्वयं मनुयाज्ञवल्क्यौ कथयतो यद् आयव्ययादिविषये परिवारे सम्यग् दर्शनप्रदर्शनाय च स्त्रियः शिक्षिताः स्युरिति। पुराणसमयेऽपि शिक्षितानां स्त्रीणां महान् उल्लेखो मिलति यथोपरिभागे प्रदर्शितः। परन्तु एतदवश्यमस्ति यद् वैदिकसमयस्य सा सहशिक्षा या पुरुषाणां समा स्त्रीणां कृतेऽपि आसीत्, कालक्रमेण सा शिक्षा स्त्रीसमाजतः परिभ्रष्टा। स्त्रीणां कार्यक्षेत्रं समाजे पुरुषाणां समानं न भूत्वा परिवारस्य साहाय्येन आदर्शमातृपत्नीपुत्रीत्वे प्रतिष्ठितमभूत्। इह पुराणयुगे समागत्य नारीशिक्षायाः क्षेत्रं परिवारं कुटुम्बमेवासीत् तथापि राजनैतिकधार्मिकादिषु चतुर्मुखी शिक्षायोजना समभवत् । मनुः पुनरपि कथयति यत् स्त्रीणां कृते पतिसेवैव निमित्तम्। पतिसेवैव गुरुकुलवास इति -

"पतिसेवा गुरौ वासः ।[33]

ब्रह्मपुराणेऽपि प्रोक्तं यत् सर्वेषां वर्णानां गुरुर्ब्रह्मणो भवति। स्त्रीणां गुरुः तस्याः पतिरेव, अभ्यागतः सर्वेषां गुरुः। यथा-

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
( Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:8(1), August, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः।
पतिरेव गुरुः स्त्रीणां सर्वस्याभ्यागतो गुरुः॥[34]

स्कन्दपुराणेऽपि अगस्त्यपत्नीं लोपामुद्रां प्रशंसन् बृहस्पतिः प्रोक्तवान् यत् स्त्रीकृते पतिरेव देवता, पतिरेव गुरुस्तथा धर्मतीर्थव्रतम् अपि पतिरेवेति। स्त्री केवलं पतिमेव प्रपूजयेत् -

भर्ता देवो गुरुर्भर्ता धर्मतीर्थव्रतानि च।
तस्मात्सर्वं परित्यज्य पतिमेकं समर्चयेत्॥[35]

अत एव पुराणकाले समागत्य नार्यः कन्यावस्थायां स्वमातापितृभ्यां गृहिण्यवस्थायां च स्वपतिसकाशात् शिक्षां लेभिरे।

**निष्कर्षः -**

अत एवेत्थं निगद्यतेऽत्र विषये यत् पुराणसमयः शैक्षणिकसंस्कारदृष्ट्यापि नारीणां कृते महत्त्वस्य विषयः समभवत्। परिवारस्यैव तस्मिन् समये शिक्षायाः स्थलकेन्द्रसत्त्वेऽपि सर्वप्रकारस्य शिक्षा तस्मिन्नवसरे प्राप्ताऽऽसीत्। पुराणसमयं सभ्यशिक्षितसमाजस्य युगमपि कथयेम तर्हि अतिशयोक्तिर्न भवितुमर्हति। गृहे स्थित्वाऽपि स्त्रियः स्वकीयमानमर्यादाशीलरक्षया सह बहुप्रकारस्य शिक्षां प्राप्तुं प्रभवन्ति स्म। भारतीयसांस्कृतिकपरम्परायां पुराणानां स्थानं परमं महत्त्वपूर्णं दृश्यते। एतेषु धर्मनियमाः, सामाजिकव्यवस्थाः, आचारशास्त्रं, स्त्रीपुरुषकर्तव्यविवेचनं च सम्यग्दर्शितम्। विशेषतया नारीणां शिक्षाया विषये पुराणेषु यत् निरूपणं दृश्यते, तत् न केवलं ऐतिहासिकदृष्ट्या महत्वपूर्णं, अपि तु आधुनिकसमाजस्य नारीविकासाय अपि सार्थकमार्गदर्शनं दत्तमिव दृश्यते।

नारीशिक्षा, यथा पुराणेषु वर्ण्यते, सा केवलं शास्त्राध्ययनपर्यन्तं न सीमिता, अपि तु धार्मिकनिष्ठा, पतिव्रतधर्मे निष्ठा, व्रताचारपालनम्, गृहव्यवस्थापनं, सन्तानशिक्षणं, सहनशीलता, आत्मसंयमः, ब्रह्मविचारः च इत्येतेषां मूल्यवानां गुणानां शिक्षां समाविशत्। एषा समन्वितशिक्षा स्त्रीणां व्यक्तित्वविकासाय, कुटुम्बस्य रक्षायै, समाजस्य धारणाय च अनिवार्या अभवत्। अनेकेषु पुराणेषु – स्कन्दपुराणे, पद्मपुराणे, गरुडपुराणे, मार्कण्डेयपुराणे च – स्त्रीणां गुणसम्पन्नता, शिक्षायाः स्वरूपं च विस्तरेण निरूपितम्।

उदाहरणरूपेण यदि विचार्यते, अनसूया, सीता, सावित्री, गार्गी, मैत्रेयी इत्याद्याः स्त्रियः शिक्षायुक्ताः, धर्मनिष्ठाः, आत्मबलसम्पन्नाः च आसन्। एतेषां जीवनकथाः शिक्षायाः आदर्शं रूपं ददति, यत्र स्त्री केवलं गृहिणी न, अपि तु धर्मस्य, ज्ञानस्य, समाजस्य च आधाररूपेण स्थापिता अस्ति। पुराणेषु यः दृष्टिकोणः नारीशिक्षायाः विषये प्रकाशितः, सः केवलं प्राचीनसन्दर्भे न सीमितः, अपि तु अद्यतनवर्तमानस्य समाजस्य अपि दिशा दर्शयति। आज्ञासंपन्ना, धर्मनिष्ठा, विवेकशालिनी, कर्तव्यपरायणा च स्त्री यदा शिक्षायाः माध्यमेन स्वात्मानं विकासयति, तदा सा सम्पूर्णसमाजस्य समुन्नत्यै योगदानं ददाति।

आधुनिके युगे शिक्षायाः स्वरूपे परिवर्तनं जातम्। विज्ञानप्रगत्याः, तन्त्रज्ञानविस्तारस्य च प्रभावेण स्त्रीशिक्षा बहुविधायाम् दिशायां वर्धते स्म। तथापि, नैतिकशिक्षायाः, संस्कारशिक्षायाः, धर्मबोधस्य च आवश्यकता अद्यापि अतीव अस्ति। एते सर्वे तत्त्वाः पुराणेषु प्राचीनैः ऋषिभिः सुस्थापिताः। अतः, यदि वयं पुराणेषु नारीशिक्षाया मूल्यम् सम्यगवगच्छामः, तर्हि आधुनिकशिक्षायामपि तेषां तत्वानां समावेशेन स्त्रीणां सर्वांगीणविकासः साध्यः भवेत्। शिक्षिता स्त्री आत्मविश्वासयुक्ता, विवेकसम्पन्ना, समाजनिर्मात्री च भवति। एवं, निष्कर्षरूपेण वक्तुं शक्यते यत् **'पुराणेषु नारीशिक्षा'** आदर्शरूपेण प्रस्तुताः अस्ति, या न केवलं स्त्रीणां अपि तु समग्रसमाजस्य उज्ज्वलभविष्याय आवश्यकं पथदर्शनं करोति।

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
( Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:8(1), August, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

**।। संकेतसूची ।।**

1.महाभारतम्, आदिपर्व, प्रथमोऽध्यायः; श्लो. 267.

2. सुभाषितरत्नसंग्रहः, पृ. 30, श्लो. 2।

3. चाणक्यनीतिः, अ. 2, श्लो. 11।

4. बृहदारण्यकोपनिषद्, 6/4/17।

5. संस्काररत्नमाला – भागः 1, चतुर्थं प्रकरणम्।

6. मनु. अ. 2 श्लो. 26।

7. वीरमित्रोदय-संस्कार-प्रकाशः, पृ. 402-403 तथा स्मृतिचन्द्रिका, भागः 1।

8.मनु० 2/66-67.

9. श्रीदेवीभागवतम् - 4/11/47-49।

10. वायुपुराणम् अ. 97 श्लो. 135।

11. वायुपुराणम् 107/36, पृ. 433 तथा श्रीदेवीभागवतम् 4/11/49-52।

12. भविष्यपुराणम् 103/22।

13. देवीभागवत्पुराणम् – तृतीयस्कन्दः 18 अ।

14. शिवपुराणम्, शतरुद्रसंहिता-3/28।

15. विष्णुपुराणम् 5/27/7

16. वामनपुराणम् 63।23।

17. कूर्मपुराणम्, पूर्वार्द्धम्, 24।55-57।

18. भविष्यपुराणम् 24/105।

19. स्कन्दपुराणम् 4 काशीखण्डे, 76।94-95।

20. तदेव, 17/106,110-111।

21. स्कन्दपुराणम्, 4 काशीखण्डे -45/8-9।

22. ब्रह्मवैवर्तपुराणम्, 2 प्रकृतिखण्डे, अ. 46, श्लो. 14-19।

23. वराहपुराणम् अ. 137, श्लो. 89-80।

24. मार्कण्डेयपुराणम्, चतुस्त्रिंशदधिकशततमोऽध्यायः, श्लो. 21-36।

25. कल्किपुराणम् - तृतीयांशे प्रथमोऽध्यायः, श्लो. 11-14।

26. स्कन्दपुराणम् १ माहेश्वरखण्डः, एकोनषष्टितमोऽध्यायः, श्लो. 37-40।

27. (क) मार्कण्डेयपुराणम् - देवीमाहात्यम्।

(ख) देवीभागवतपुराणम् पूर्वार्द्ध पञ्चमस्कन्धः।

28. विष्णुपुराणम् अंशः 5 अ. 23 श्लो. 11।

29. मार्कण्डेयपुराणम् पञ्चषष्टितमोऽध्यायः, श्लो, 15-17।

30. मार्कण्डेयपुराणम् त्रिषष्टितमोऽध्यायः, श्लो. 26-28।

31. ब्रह्मवैवर्तपुराणम् - प्रथमखण्डः, त्रयोदशाध्यायाद् अष्टादशाध्यायपर्यन्तम्।

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
( Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:8(1), August, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

32.मनु. 5/151

33. मनु. 2/67।

34. ब्रह्मपुराणम् 80/47।

35. स्कन्दपुराणम् काशीखण्डे, 4/48।

**।। सहायकग्रन्था: ।।**

1.महाभारतम् - व्यासः। सम्पा. विष्णुशर्मा सुक्थाङ्करः। भाण्डारकर प्राच्यविद्याभवनम्, 1933–1966।

2.सुभाषितरत्नसंग्रहः - सम्पा. अनुवाचकः च ए. ए. रमणाथन्। मद्रास सरकारस्य प्राच्यग्रन्थमाला, 1952।

3.चाणक्यनीतिः - चाणक्यः। अनुवादकः बी. के. चतुर्वेदी। डायमण्ड् पुस्तकमाला, 2005।

4.बृहदारण्यकोपनिषद् - अनुवादकः स्वामी माधवानन्दः। अद्वैताश्रमः, 1950।

5.संस्काररत्नमाला - गोपीनाथ दीक्षितः। सम्पा. हरि नारायण आपटे, आनन्दाश्रममुद्रणम्, 1820।

6.मनुस्मृतिः – मनुः, सम्पादकः पं. रामनारायणविद्यारत्न। वाराणसी: चौखम्भा संस्कृत भवन, 1985।

6..वीरमित्रोदयः-संस्कारप्रकाशः-मित्रमिश्रः। सम्पा. श्रीकृष्णपाण्डुरङ्गयाज्ञिकः। आनन्दाश्रमसंस्था, पुणे, 1912।

7.देवीभागवतपुराणम्:-वेदव्यासः। सम्पादकः रामानन्दसरस्वती। वाराणसी: चौखम्भा संस्कृत सीरीज कार्यालयः।

8.शिवपुराणम्, शतरुद्रसंहिता-वेदव्यासः। सम्पादकः पं० श्रीलालबहादुरशास्त्री। वाराणसी: चौखम्भा , 2007।

9.विष्णुपुराणम्-वेदव्यासः। सम्पादकः श्रीनिवास अय्यंगारः। दिल्ली: मोतीलाल बनारसीदास्, 1999।

10.वामनपुराणम्-वेदव्यासः। सम्पादकः अच्युतानन्द याज्ञिकः। वाराणसी: चौखम्भा कृष्णदास अकादमी, 2002।

11.कूर्मपुराणम् -वेदव्यासः। सम्पादकः द्वारकाप्रसाद शास्त्री। दिल्ली: नाग पब्लिशर्स्, 1985।

12.भविष्यपुराणम् - वेदव्यासः। सम्पादकः काशीनाथ शास्त्री आगाशे। पूना: आनन्दाश्रममुद्रणालयः, 1932।

13.वराहपुराणम् - व्यासः। सम्पा. काशीनाथ शास्त्री। वाराणसी: चौखम्भा संस्कृत सीरीज कार्यालयः, 1990।

14.अग्निपुराणम् – व्यासदेवः, सम्पादकः विष्णुशास्त्री पण्डितः। मुंबई: नीराजनप्रकाशनम्, 1900।

15.लिङ्गपुराणम् - व्यासदेवः, सम्पादकः श्रीकृष्णशास्त्री। वाराणसी: चौखम्भा ओरियण्टल, 1924।

16.स्कन्दपुराणम् - व्यासदेवः , सम्पादकः गणपतिशास्त्री। दिल्ली: मोतीलाल बनारसीदास, 1988।

17.ब्रह्मवैवर्तपुराणम् - व्यासदेवः, सम्पादकः श्रीधरशास्त्री। कलकत्ता: संस्कृतप्रेस्, 1893।

18.कल्किपुराणम् - व्यासदेवः, सम्पादकः केशवशास्त्री। वाराणसी: चौखम्भा अमरभारती प्रकाशन, 1910।

19.श्रीमद्भागवतम्- व्यासदेवः, सम्पादकः श्री स्वामी तपोवनाचार्यः। ऋषिकेश: तपोवनप्रकाशनम्, 1975।